# Shri Hanumat Kavacham

# શ્રીહનુમત્કવચમ્

## Document Information

Text title : hanumatkavacham from nAradapurANa

File name : hanumatkavachamnAradapurANa.itx

Category : hanumaana, kavacha

Location : doc_hanumaana

Proofread by : NA, Kirk Wortman

Source : Naradapurana Purvabhag Adhyaya 78

Latest update : August 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2024

*sanskritdocuments.org*

# Shri Hanumat Kavacham

# શ્રીહનુમત્કવચમ્

સનત્કુમાર ઉવાચ ।
કાર્તવીર્યસ્ય કવચં કથિતં તે મુનીશ્વર ।
મોહવિધ્વંસનં જૈત્રં મારુતેઃ કવચં શૃણુ ॥ ૧॥

યસ્ય સન્ધારણાત્સદ્યઃ સર્વે નશ્યન્ત્યુપદ્રવાઃ ।
ભૂતપ્રેતારિજં દુઃખં નાશમેતિ ન સંશયઃ ॥ ૨॥

એકદાહં ગતો દ્રષ્ટું રામં રમયતાં વરમ્ ।
આનન્દવનિકાસંસ્થં ધ્યાયન્તં સ્વાત્મનઃ પદમ્ ॥ ૩॥

તત્ર રામં રમાનાથં પૂજિતં ત્રિદશેશ્વરૈઃ ।
નમસ્કૃત્ય તદાદિષ્ટમાસનં સ્થિતવાન્ પુરઃ ॥ ૪॥

તત્ર સર્વં મયા વૃત્તં રાવણસ્ય વધાન્તકમ્ ।
પૃષ્ટં પ્રોવાચ રાજેન્દ્રઃ શ્રીરામઃ સ્વયમાદરાત્ ॥ ૫॥

તતઃ કથાન્તે ભગવાન્મારુતેઃ કવચં દદૌ ।
મહ્યં તત્તે પ્રવક્ષ્યામિ ન પ્રકાશ્યં હિ કુત્રચિત્ ॥ ૬॥

ભવિષ્યદેતન્નિર્દિષ્ટં બાલભાવેન નારદ ।
શ્રીરામેણાઞ્જનાસૂનોર્ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૭॥

## અથ કવચમ્ ।

હનુમાન્ પૂર્વતઃ પાતુ દક્ષિણે પવનાત્મજઃ ।
પાતુ પ્રતીચ્યામક્ષઘ્નઃ સૌમ્યે સાગરતારકઃ ॥ ૮॥

ઊર્ધ્વં પાતુ કપિશ્રેષ્ઠઃ કેસરિપ્રિયનન્દનઃ ।
અધસ્તાદ્વિષ્ણુભક્તસ્તુ પાતુ મધ્યે ચ પાવનિઃ ॥ ૯॥

લઙ્કાવિદાહકઃ પાતુ સર્વાપદ્ભ્યો નિરન્તરમ્ ।

સુગ્રીવસચિવઃ પાતુ મસ્તકં વાયુનન્દનઃ ॥ ૧૦॥

ભાલં પાતુ મહાવીરો ભ્રુવોર્મધ્યે નિરન્તરમ્ ।
નેત્રે છાયાપહારી ચ પાતુ નઃ પ્લવગેશ્વરઃ ॥ ૧૧॥

કપોલૌ કર્ણમૂલે ચ પાતુ શ્રીરામકિઙ્કરઃ ।
નાસાગ્રમઞ્જનાસૂનુઃ પાતુ વક્ત્રં હરીશ્વરઃ ॥ ૧૨॥

પાતુ કણ્ઠે તુ દૈત્યારિઃ સ્કન્ધૌ પાતુ સુરારિજિત્ ।
ભુજૌ પાતુ મહાતેજાઃ કરૌ ચ ચરણાયુધઃ ॥ ૧૩॥

નખાન્નખાયુધઃ પાતુ કુક્ષૌ પાતુ કપીશ્વરઃ ।
વક્ષો મુદ્રાપહારી ચ પાતુ પાર્શ્વે ભુજાયુધઃ ॥ ૧૪॥

લઙ્કાનિભર્જનઃ પાતુ પૃષ્ઠદેશે નિરન્તરમ્ ।
નાભિં શ્રીરામભક્તસ્તુ કટિં પાત્વનિલાત્મજઃ ॥ ૧૫॥

ગુહ્યં પાતુ મહાપ્રાજ્ઞઃ સક્થિની અતિથિપ્રિયઃ ।
ઊરૂ ચ જાનુની પાતુ લઙ્કાપ્રાસાદભઞ્જનઃ ॥ ૧૬॥

જઙ્ઘે પાતુ કપિશ્રેષ્ઠો ગુલ્ફૌ પાતુ મહાબલઃ ।
અચલોદ્ધારકઃ પાતુ પાદૌ ભાસ્કરસન્નિભઃ ॥ ૧૭॥

અઙ્ગાનિ પાતુ સત્ત્વાઢ્યઃ પાતુ પાદાઙ્ગુલીઃ સદા ।
મુખાઙ્ગાનિ મહાશૂરઃ પાતુ રોમાણિ ચાત્મવાન્ ॥ ૧૮॥

દિવારાત્રૌ ત્રિલોકેષુ સદાગતિસુતોઽવતુ ।
સ્થિતં વ્રજન્તમાસીનં પિબન્તં જક્ષતં કપિઃ ॥ ૧૯॥

લોકોત્તરગુણઃ શ્રીમાન્ પાતુ ત્ર્યમ્બકસમ્ભવઃ ।
પ્રમત્તમપ્રમત્તં વા શયાનં ગહનેઽમ્બુનિ ॥ ૨૦॥

સ્થલેઽન્તરિક્ષે હ્યગ્નૌ વા પર્વતે સાગરે દ્રુમે ।
સઙ્ગ્રામે સઙ્કટે ઘોરે વિરાડ્રૂપધરોઽવતુ ॥ ૨૧॥

ડાકિનીશાકિનીમારીકાલરાત્રિમરીચિકાઃ ।
શયાનં માં વિભુઃ પાતુ પિશાચોરગરાક્ષસીઃ ॥ ૨૨॥

દિવ્યદેહધરો ધીમાન્સર્વસત્ત્વભયઙ્કરઃ ।
સાધકેન્દ્રાવનઃ શશ્વત્પાતુ સર્વત એવ મામ્ ॥ ૨૩॥

યદ્રૂપં ભીષણં દૃષ્ટ્વા પલાયન્તે ભયાનકાઃ ।
સ સર્વરૂપઃ સર્વજ્ઞઃ સૃષ્ટિસ્થિતિકરોઽવતુ ॥ ૨૪॥

સ્વયં બ્રહ્મા સ્વયં વિષ્ણુઃ સાક્ષાદ્દેવો મહેશ્વરઃ ।
સૂર્યમણ્ડલગઃ શ્રીદઃ પાતુ કાલત્રયેઽપિ મામ્ ॥ ૨૫॥

યસ્ય શબ્દમુપાકર્ણ્ય દૈત્યદાનવરાક્ષસાઃ ।
દેવા મનુષ્યાસ્તિર્યઞ્ચઃ સ્થાવરા જઙ્ગમાસ્તથા ॥ ૨૬॥

સભયા ભયનિર્મુક્તા ભવન્તિ સ્વકૃતાનુગાઃ ।
યસ્યાનેકકથાઃ પુણ્યાઃ શ્રૂયન્તે પ્રતિકલ્પકે ॥ ૨૭॥

સોઽવતાત્સાધકશ્રેષ્ઠં સદા રામપરાયણઃ ।
વૈધાત્રધાતૃપ્રભૃતિ યત્કિઞ્ચિદ્દૃશ્યતેઽત્યલમ્ ॥ ૨૮॥

વિદ્ધિ વ્યાપ્તં યથા કીશરૂપેણાનઞ્જનેન તત્ ।
યો વિભુઃ સોઽહમેષોઽહં સ્વીયઃ સ્વયમણુર્બૃહત્ ॥ ૨૯॥

ઋગ્યજુઃસામરૂપશ્ચ પ્રણવસ્ત્રિવૃદધ્વરઃ ।
તસ્મૈ સ્વસ્મૈ ચ સર્વસ્મૈ નતોઽસ્મ્યાત્મસમાધિના ॥ ૩૦॥

અનેકાનન્તબ્રહ્માણ્ડધૃતે બ્રહ્મસ્વરૂપિણે ।
સમીરણાત્મને તસ્મૈ નતોઽસ્મ્યાત્મસ્વરૂપિણે ॥ ૩૧॥

નમો હનુમતે તસ્મૈ નમો મારુતસૂનવે ।
નમઃ શ્રીરામભક્તાય શ્યામાય મહતે નમઃ ॥ ૩૨॥

નમો વાનરવીરાય સુગ્રીવસખ્યકારિણે ।
લઙ્કાવિદહનાયાથ મહાસાગરતારિણે ॥ ૩૩॥

સીતાશોકવિનાશાય રામમુદ્રાધરાય ચ ।
રાવણાન્તનિદાનાય નમઃ સર્વોત્તરાત્મને ॥ ૩૪॥

મેઘનાદમખધ્વંસકારણાય નમો નમઃ ।
અશોકવનવિધ્વંસકારિણે જયદાયિને ॥ ૩૫॥

વાયુપુત્રાય વીરાય આકાશોદરગામિને ।
વનપાલશિરશ્છેત્રે લઙ્કાપ્રાસાદભઞ્જિને ॥ ૩૬॥

જ્વલત્કાઞ્ચનવર્ણાય દીર્ઘલાઙ્ગૂલધારિણે ।
સૌમિત્રિજયદાત્રે ચ રામદૂતાય તે નમઃ ॥ ૩૭॥

અક્ષસ્ય વધકર્ત્રે ચ બ્રહ્મશસ્ત્રનિવારિણે ।
લક્ષ્મણાઙ્ગમહાશક્તિજાતક્ષતવિનાશિને ॥ ૩૮॥

રક્ષોઘ્નાય રિપુઘ્નાય ભૂતઘ્નાય નમો નમઃ ।
ઋક્ષવાનરવીરૌઘપ્રાસાદાય નમો નમઃ ॥ ૩૯॥

પરસૈન્યબલઘ્નાય શસ્ત્રાસ્ત્રઘ્નાય તે નમઃ ।
વિષઘ્નાય દ્વિષઘ્નાય ભયઘ્નાય નમો નમઃ ॥ ૪૦॥

મહારિપુભયઘ્નાય ભક્તત્રાણૈકકારિણે ।
પરપ્રેરિતમન્ત્રાણાં મન્ત્રાણાં સ્તમ્ભકારિણે ॥ ૪૧॥

var યન્ત્રાણાં સ્તમ્ભકારિણે
પયઃપાષાણતરણકારણાય નમો નમઃ ।
બાલાર્કમણ્ડલગ્રાસકારિણે દુઃખહારિણે ॥ ૪૨॥

નખાયુધાય ભીમાય દન્તાયુધધરાય ચ ।
વિહઙ્ગમાય શર્વાય વજ્રદેહાય તે નમઃ ॥ ૪૩॥

પ્રતિગ્રામસ્થિતાયાથ ભૂતપ્રેતવધાર્થિને ।
કરસ્થશૈલશસ્ત્રાય રામશસ્ત્રાય તે નમઃ ॥ ૪૪॥

કૌપીનવાસસે તુભ્યં રામભક્તિરતાય ચ ।
દક્ષિણાશાભાસ્કરાય સતાં ચન્દ્રોદયાત્મને ॥ ૪૫॥

કૃત્યાક્ષતવ્યથાઘ્નાય સર્વક્લેશહરાય ચ ।
સ્વામ્યાજ્ઞાપાર્થસઙ્ગ્રામસખ્યસઞ્જયકારિણે ॥ ૪૬॥

ભક્તાનાં દિવ્યવાદેષુ સઙ્ગ્રામે જયકારિણે ।
કિલ્કિલારવકારાય ઘોરશબ્દકરાય ચ ॥ ૪૭॥ var કિલ્કિલાબુબુકારાય

સર્વાગ્નિવ્યાધિસંસ્તમ્ભકારિણે ભયહારિણે ।
સદા વનફલાહારસન્તૃપ્તાય વિશેષતઃ ॥ ૪૮॥

મહાર્ણવશિલાબદ્ધસેતુબન્ધાય તે નમઃ ।

## ફલશ્રુતિઃ ।

ઇત્યેતત્કથિતં વિપ્ર મારુતેઃ કવચં શિવમ્ ॥ ૪૯॥

યસ્મૈ કસ્મૈ ન દાતવ્યં રક્ષણીયં પ્રયત્નતઃ ।
અષ્ટગન્ધૈર્વિલિખ્યાથ કવચં ધારયેત્તુ યઃ ॥ ૫૦॥

કણ્ઠે વા દક્ષિણે બાહૌ જયસ્તસ્ય પદે પદે ।
કિં પુનર્બહુનોક્તેન સાધિતં લક્ષમાદરાત્ ॥ ૫૧॥

પ્રજપ્તમેતત્કવચમસાધ્યં ચાપિ સાધયેત્ ॥ ૫૨॥

ઇતિ શ્રીબૃહન્નારદીયપુરાણે પૂર્વભાગે બૃહદુપાખ્યાને
તૃતીયપાદે હનુમત્કવચનિરૂપણં નામાષ્ટસપ્તતિતમોઽધ્યાયઃ ॥ ૭૮॥

ઇસ નારદપુરાણોક્ત મારુતિકવચ મેં હનુમાનજી કો પ્રત્યેક શ્લોકોં કે દ્વારા નમસ્કાર કિયા ગયા હૈ ઔર ઉન્હેં રામ કા બાણ કહકર સમ્બોધિત ભી કિયા હૈ । ઇસ કલ્યાણકારી મારુતિકવચ કા જો ભી સાધક પ્રતિદિન બ્રાહ્મમુહૂર્ત મેં પાઠ કરતા હૈ, ઉસકી સમસ્ત મનોકામનાએઁ પૂર્ણ હોતી હૈં । જો પ્રાણી ઇસ કવચ કો અષ્ટગન્ધ સે લિખકર અપને ગલે યા અપની દાહિની ભુજા મેં ધારણ કરતા હૈ । ઉસે હર કાર્ય મેં સફલતા પ્રાપ્ત હોતી હૈ । યદિ એક લાખ બાર શ્રદ્ધા એવં ભક્તિ સે ઇસ કવચ કા પાઠ કરકે ઇસે સિદ્ધ કર લિયા જાય તો અસાધ્ય કાર્ય ભી સિદ્ધ હો જાતે હૈં । ઇસમેં સંશય નહીં હૈં ।

બૃહન્નારદીયપુરાણ । પૂર્વભાગ । અધ્યાય ૭૮/૮-૫૨॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 78/8-52..

NA, Kirk Wortman

*Shri Hanumat Kavacham*

pdf was typeset on September 18, 2024

Please send corrections to *sanskrit@cheerful.com*